"ॐ"

श्रीगणेशायनमः ग्रथ-प्रार्यासप्तशतीप्रारम्भः ॥ वैशम्पायन उवाच ॥

आर्यासप्तशतं प्रवक्ष्यामि यथोक्तं ऋषिभिः पुरा ॥ नारायणीं नमस्यामि देवीं विष्णुमनेश्वरीम् ॥१॥ यंहि सिद्धिर्धृतिः कीर्तिः श्रीर्विद्या सन्नतिर्मतिः ॥ संध्या रात्रिः प्रभा निद्रा कालरात्रिस्तथैवच ॥२॥ ग्रार्या कात्यायनी देवी कौशकी ब्रह्मजननी सिद्धसैन्यस्य उग्रचारी बलाहवला ॥३॥ जयचविजयाचैव पुष्टिं सृष्टिः दामादया ॥ ज्येष्ठा यमस्य भगिनी नीलकौशेयवासनी ॥४॥ बहुरूपा विरूपाच ग्रनेकाधिष्ठचारिणी ॥ विरूपाक्षी विशालाक्षी भक्तानां परिरक्षिणी ॥५॥ पर्वतायेषु घोरेषु नदीषु च गुहासुच ॥ वास सत्व महादेवि वनेषूपवनेषुच ॥६॥ शवरैर्बर्बरैश्चैव पुलिंदैश्च सुपूजिता ॥ मयूरपिच्छध्वजिनी लोकान् क्रमसि सर्वशः ॥७॥ कुक्कुटैश्छगलैर्मेषैर्वराहैस्समाकुला ॥ घंटानिनादबहुलांविंध्यवासिन्यभिधुता ॥८॥ त्रिशूलीपट्टिशधरा सूर्यचन्द्रपताकिनी ॥ नवमी कृष्णपक्षस्य सा स्यैकादशी तथा ॥९॥ भगिनी बलदेवस्य रजनी कलहप्रिया ॥ ग्रावासः सर्वभूतानां निष्ठाच परमागतिः ॥१०॥ नंदगोपसुताचैव देवानां विजयावहा ॥ चीरवासाः सुवासाश्च रौद्री संध्याचरीनिशा ॥११॥ प्रकीर्णकेशीमुण्डाश्च सुरामांसबलिप्रिया ॥ लक्ष्मीर्लक्ष्मीरूपेण दानवानांवधायच ॥१२॥ सावित्रीचापिदेवानां माता मन्त्रेषुरास्यच ॥ कन्यानां ब्रह्मचर्यंच सौभाग्यं प्रमदासुच ॥१३॥ ग्रन्तर्वेदीच यज्ञानामृत्विजां चैवदक्षिणा ॥ कर्मकारणंचसीतेति भूतानांधरणीतिच ॥१४॥ सिद्धिः सांयात्रिकाणांतु वेलात्वंसागरस्यच ॥ यज्ञानांप्रथमायज्ञी नागानां

सरस्वतीति च ॥१५॥ वज्रवादित्यघोदीक्षा शोभाच परमातथा ॥
ज्योतिषां त्वंप्रभा देवी नक्षत्राणांच रोहिणी ॥१६॥ यज्ञद्वारेषु तीर्थेषु
नदीनां संगमेषुच ॥ पूर्णाच पूर्णिमा चन्द्रे कृत्तिवासा इतिस्मृ
ता ॥१७॥ सरस्वतीच वाल्मीकि सृष्टौ द्वैपायनेतथा ॥ ऋषीणां
धर्मबुद्धिसु देवानां मानसी तथा ॥१८॥ त्वंदेवी तु भूतेषु सू
यसे त्वंस्वकर्मभिः ॥ इन्द्रस्य वज्रदृष्टिस्त्वं सहस्रनयनोतिच
१९॥ तपसांच देवी त्व मरणी चाग्नि होत्रिणाम ॥ क्षुधाच सर्व
भूतानां तृप्तिस्त्वं देवतेषुच ॥२०॥ स्वाहा तृप्तिर्धृतिर्मेधा वसू
नांत्वं वसूमती ॥

अमंत्रक

श्रीकल्याणं भवेत्

आशा त्वं मानुषाणां च पशूनां च कृताकर्मणाम् ॥ दिशश्च विदिशश्चैव तथाग्नेयी रवाप्रभा ॥ २१ ॥ शकुनीपूतना चैव रेवती च सुदारुणा ॥ निद्राऽपि सर्वभूतानां मोहिनी क्षान्तिया तथा ॥ २२ ॥ विद्यानां ब्रह्मविद्या त्वं मोक्षदा कौशिकी तथा ॥ ~~यथार्थनामभिर्देवि दुर्गासीत्यभिधीयसे ॥ २३ ॥~~ नारसिंही पार्वती च त्वं पौरुषी मृषयोविदुः ॥ २३ ॥ अरुन्धती च साध्वीनां प्रजापतिवचो यथा ॥ यथार्थनामभिर्देवि दुर्गासीत्यभिधीयसे ॥ २४ ॥ त्वयाचैतन्नमिदं सर्वं जगत्स्थावरजङ्गमम् ॥ संग्रामेषु च सर्वेषु अग्निप्रज्वलितेषु च ॥ नदीतीरेषु सर्वेषु चौरेषु कान्तारेषु भयेषु च ॥ २५ ॥ प्रभाते राजबन्धे च स्मरणात्परमं नृणाम् ॥ त्राणात्यन्तेषु सर्वेषु त्वं हि रक्षा न संशयः ॥ २६ ॥ त्वयीमे हृदयं देवि त्वयि चित्तं मनस्त्वयि ॥ रक्षमां सर्वपापेभ्यः प्रसादं कर्तुमर्हसि ॥ २७ ॥ ईमं यः स्तवं दिव्यमिति व्यासप्रकल्पितम् ॥ यः पठेत्प्रातरुत्थाय शुचिः प्रयतमानसः ॥ २८ ॥ त्रिभिर्मासैरेकाह्निकं च फलं वैस व्यक्षसि ॥ षड्भिर्मासैर्वरिष्ठवरमेकं व्यक्षसि ॥ २९ ॥

र्चिताऽग्निर्मासैर्दिव्यं चक्षुः प्रयच्छसि ॥ संव
त्सरेण सिद्धिं च यथाकामं प्रयच्छसि ॥ ३० ॥ सत्यं
ब्रह्म च दिव्यं च द्वैपायनवचो यथा ॥ नरणां वन्ध्यं
वधं घोरं पुत्रनाशं धनक्षयम् ॥ ३१ ॥ व्याधिमृत्यु
भयं चैव प्रजिता शमयिष्यसि ॥ भविष्यसि महाभा
गे वरदा कामरूपिणी ॥ स्तुता मोहयित्वा तं कंस
मेकात्वं भोक्ष्यसे जगत् ॥ ३२ ॥ अहमप्यात्मनो वृत्तिं
विधास्ये गोषु गोपवत् ॥ स्वदृश्यर्थमहं चैव करिष्ये
कंसगोपताम् ॥ ३३ ॥ एवं तां संसमादिश्य गतोऽन्त
र्द्धानमीश्वरः ॥ सापि तं नमस्कृत्य तथास्त्वितिच
चानिश्चिता ॥ ३४ ॥ यश्चैतत्पठते स्तोत्रं शरणार्थी
ऽप्यभीक्ष्णशः ॥ सर्वार्थसिद्धिं लभते नरो नात्र
संशयः ॥ ३५ ॥ इति श्रीखिलेषु हरिवंशेषु विष्णु
पर्वणि स्वपुत्रगर्भविधानेआर्यास्तुतिर्नाम तृतीयो
ध्यायः ॥